Roll No.

# H-19935

## कक्षा 9 वीं परीक्षा, 2018–19

# SANSKRIT GENERAL

## संस्कृत सामान्यम

[Total No. of Questions: 19] [Total No. of Printed Pages: 08]

[Time: 03 Hours] [Maximum Marks: 100]

*निर्देशाः*

*(i) सर्वे प्रश्नाः करणीयाः।*

*(ii) प्रश्नानां सम्मुखे अङ्काः दत्ताः।*

प्र.1 उचितविकल्पं चित्वा लिखत – (1×5=5)

(क) "सदैव" इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) अयादि सन्धिः (ब) वृद्धि सन्धिः

(स) दीर्घ सन्धिः (द) विसर्ग सन्धिः

(ख) विसर्ग सन्धेः उदाहरणम् अस्ति –

(अ) पवनः (ब) महेशः

(स) मनोरथः (द) वागीश

(ग) जगत् + ईशः ............. भवति।

(अ) जगदीश (ब) जगीशः

(स) जगदेशः (द) जगदीशः

(घ) परोपकारः एतस्य पदस्य सन्धि विच्छेदः भवति –

(अ) परा + उपकारः (ब) पर + उपकारः

(स) परोप + कार (द) परो + पकारः

(ङ) अधोलिखितेषु अव्ययं अस्ति –

(अ) मीनः (ब) हरिः

(स) यदा (द) रमा

प्र.2 उचितविकल्पं चित्वा लिखत – (1×5=5)

(क) कर्मधारय समासस्य उदाहरण अस्ति –

(अ) ग्रामगतः (ब) महापुरुषः

(स) दशाननः (द) अनुरूपम्

(ख) "पञ्चवटी" इत्यस्मिन पदे समासः अस्ति –

(अ) द्वन्द्व समास (ब) बहुव्रीहि समासः

(स) द्विगु समास (द) तत्पुरुष समास

(ग) "प्रति दिनम्" इत्यस्मिन् पदे समासः अस्ति –

(अ) कर्मधारय समासः (ब) द्वन्द्व समासः

(स) बहुव्रीहि समासः (द) अव्ययीभाव समासः

(घ) "पराजय" इत्यस्मिन पदे उपसर्गः अस्ति –

(अ) परा (ब) जय

(स) राज (द) पर

(ङ) निर्धनः इत्यस्मिन् पदे उपसर्गः अस्ति –

(अ) निस् (ब) निर

(स) नि (द) निध

प्र.3 उचितविकल्पं चित्वा लिखत – (1×5=5)

(क) पठित इत्यस्मिन् पदे वचनम् अस्ति –

(अ) एकवचन् (ब) द्विवचनम्

(स) बहुवचनम् (द) अवचनम्

(ख) 'भविष्यामि' इत्यस्मिन् पदे पुरुषः अस्ति –

(अ) प्रथम पुरुषः (ब) मध्यम पुरुषः

(स) उत्तम पुरुषः (द) महापुरुषः

(ग) क्रीड़ति इत्यस्मिन् पदे धातुः अस्ति –

(अ) क्री (ब) क्र

(स) क्रीड् (द) क्रीड़ा

(घ) "अहं सर्वत्र कार्यं करोमि" अस्मिन् वाक्ये अव्ययं अस्ति –

(अ) अहम् (ब) सर्वत्र

(स) कार्य (द) करोमि

(ङ) अहसत् इत्यस्मिन् पदे लकारः अस्ति –

(अ) लट् लकारः (ब) लङ् लकारः

(स) लोट लकारः (द) लृट् लकारः

प्र.4 उचितविकल्पं चित्वा लिखत – (1×5=5)

(क) "गतवान" इत्यस्मिन् पदे प्रत्यय अस्ति –

(अ) क्तवतु (ब) ल्यप्

(स) क्तिन् (द) मतुप्

(ख) "पठ + क्त्वा" ...................... भवति।

(अ) पठितवान् (ब) पठित्वा

(स) पठयतु (द) पठितुम्

(ग) ल्यप् प्रत्ययस्य उदाहरणम् अस्ति –

(अ) प्रदाय (ब) गतः

(स) कर्तव्यः (द) पठितः

(घ) "छात्रः पठितुम् विद्यालयं गच्छति" इत्यस्मिन् वाक्ये कृदन्तयुक्त पदम् अस्ति –

(अ) छात्रः (ब) पठितुम्

(स) विद्यालयम् (द) गच्छति

(ङ) सत्यश्रमाभ्यां सकलार्थ ................।

(अ) सिद्धिः (ब) असिद्धिः

(स) बुद्धि (द) शुद्धि

प्र.5 प्रदत्त शब्दैः रिक्तस्थानपूर्तिः करणीया – (1×5=5)

(दन्तान्, सर्वारम्भाः, बुभुक्षया, पर्वते, समुद्र इव)

(1) राजकुमारः ................ पीडितः सुप्तेवान्।

(2) गृध्रकूट नाम्नि ............... पर्कटीवृक्षः अस्ति।

(3) रामः ............... गाम्भीर्ये अस्ति।

(4) रे सिंहशावक जृम्भस्व ............. ते गणयिष्यामि।

(5) तन्त्रमूलाः .................।

प्र.6 निम्नलिखितेषु प्रश्नेषु त्रयाणां उत्तराणि संस्कृत भाषायाम् एक वाक्येन लिखत – (2×3=6)

(क) युक्तेन प्राणायामेन किं भवति?

(ख) आदौ ज्ञान भानुः कुत्र उदितः?

(ग) घटः कैः सम्पूरितः?

(घ) पञ्चतन्त्रस्य रचनाकारः कः?

(ङ) दशरथः किमर्थं वनं गतवान्?

प्र.7 अधोलिखितेषु द्वयोः शब्दयोः रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत – (2)

(क) राम – तृतीया विभक्तिः

(ख) फल – पञ्चमी विभक्तिः

(ग) पितृ – प्रथमा विभक्तिः

(घ) रमा – द्वितीया विभक्तिः

प्र.8 अधोलिखितेषु शब्देषु द्वयोः शब्दयोः रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत – (2)

(क) तत् (पु.) प्रथमा विभक्तिः

(ख) किम् (स्त्री.) द्वितीया विभक्तिः

(ग) अस्मद् षष्ठी विभक्तिः

(घ) युष्मद् सप्तमी विभक्तिः

प्र.9 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां देयानि – (5×2=10)

(क) एकदा राजकुमारः चम्पा च नदीतटे क्रीड़तः आस्ताम्। तदैव राजकुमारः क्षुधापीड़ितः अभवत्। सः रोटिकां याचमानः रोदितवान्। सः न जानाति स्म यत् रोटिकायाः ग्रासमेकमपि नास्ति। चम्पा तं कथां श्रावयित्वा विनोदयामास। राजकुमारः बुभुक्षितः एव सुप्तवान्।

(i) एकदा राजकुमारः चम्पा च कुत्र क्रीड़तः आस्ताम्?

(ii) सः कां याचमानः रोदितवान्?

(iii) चम्पा तं कां श्रावयित्वा विनोदयामास?

(iv) नीत्वा इत्यस्य पदस्य प्रकृतिं प्रत्ययं च पृथक कुरुत?

(v) राजकुमारः कीदृशः सुप्तवान्?

(ख) उज्जयिनी भारतस्य अत्यन्तं प्राचीनतम् इतिहास–धर्म–दर्शन–कला–साहित्य–योग– ज्योतिषा – दीनां च केन्द्रमासीत्। एषा अवन्तिका, विशाला नाम्नापि शास्त्रेषु वर्णिता अस्ति। अत्र सर्वत्र पुरातात्त्विकं वैभवं दृष्ट्वा मनसि आनन्दो जायते। भगवतः महाकालस्य पुरीयं देशे श्रद्धायाः केन्द्रमस्ति।

(i) उज्जयिनी भारतस्य केषां केषां केन्द्रमस्ति?

(ii) एषा शास्त्रेषु केन नाम्नापि वर्णिता अस्ति?

(iii) किम् दृष्ट्वा मनसि आनन्दो जायते?

(iv) श्रद्धायाः केन्द्रम् का?

(v) दृष्ट्वा इत्यस्मिन् पदे कः प्रत्यय अस्ति?

(ग) कश्चित एकः महान् तपस्वी ऋषिः आसीत्। सः लोककल्याणार्थम् अहर्निशं भूतले भ्रमति स्म। एकदा सः परिभ्रमन् एकं ग्रामम् अगच्छत्। ग्रामस्य एकस्मिन् गृहे एकः शुकः पालितः आसीत्। सः शुकः ऋषिं दृष्ट्वा "मारयतु कुट्टयतु" इति वारं वारं उच्चैः उक्तवान्। अनन्तरं सः ऋषिः अपरं स्थानम् अगच्छत् तत्रापि एकस्मिन् गृहे शुकः पालितः आसीत्। सः ऋषिं दृष्ट्वा "सीताराम – सीताराम" इति उक्तवान्। एवं शुकयोः भिन्नव्यवहारं दृष्ट्वा ऋषिः आश्चर्यसागरे निमग्न अभवत्।

(i) ऋषिः किमर्थं भ्रमति स्म?

(ii) परिभ्रमन् ऋषिः कुत्र अगच्छत्?

(iii) ग्रामस्य एकस्मिन् गृहे कः पालितः आसीत्?

(iv) प्रथमः शुकः किं वदति स्म?

(v) अपरः शुकः किं वदति स्म?

प्र.10 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां देयानि– (5×2=10)

(क) नास्ति क्षुधासमं दुःखं, नास्ति रोगः क्षुधासमः।
नास्त्याहारसमं सौख्यं, नास्ति क्रोधसमो रिपुः।।

(i) क्षुधासमः कः नास्ति?

(ii) रोगः कीदृशः नास्ति?

(iii) आहारसमं किं न अस्ति?

(iv) क्रोधसमः कः नास्ति?

(v) "नास्ति" इति पदस्य सन्धि विच्छेदं कृत्वा सन्धेः नाम लिखत।

(ख) परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

धर्मसंस्थापनार्थाय सम्भवामि युगे – युगे।।

(i) केषां परित्राणाय सम्भवामि?

(ii) केषां विनाशाय सम्भवामि?

(iii) किमर्थं सम्भवामि?

(iv) कदा सम्भावि?

(v) "साधूनाम्" इत्यस्य पदस्य विभक्तिः वचनं च लिखत ।

(ग) इक्ष्वाकुवंश प्रभवो रामो नाम जनैः श्रुतः।

नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी।।

(i) रामः कस्मिन् वंशे प्रभवः?

(ii) जनैः कस्य नाम श्रुतः?

(iii) नियतात्मा कः आसीत्?

(iv) महावीर्यो द्युतिमान धृतिमान् वशी च आसीत् इति कैः श्रुतः?

(v) श्रुतः इतिपदे धातु प्रत्ययञ्च पृथक पृथक कुरुत।

प्र.11 उचित् युग्ममेलनं कुरुत केचित् चत्वारः –

| | | | |
|---|---|---|---|
| (क) | तमसा | (i) | भाषणम् |
| (ख) | कविता | (ii) | सीताराम |
| (ग) | शुकवद् | (iii) | नदी |
| (घ) | कृषकाः | (iv) | कालिदासः |
| (ङ) | मुनि शुकः | (v) | कृषिकार्यम् |

प्र.12 शुद्धानाम् वाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत – (केचित् चत्वारः) **(4)**

(क) सज्जनानां सङ्गति करणीया।

(ख) गोपाल गीताया गाता।

(ग) वाल्मीकि आदिकविः अस्ति।

(घ) राजा बालं न लालयति।

(ङ) रामः रावणं न हतवान्।

प्र.13 निम्नलिखितेषु चतुर्णां प्रश्नानां उत्तराणि संस्कृते एकपदेन लिखत – **(1×4=4)**

(i) जातस्य ध्रुवं किम्?

(ii) चर्वणं कथं कुर्यात्?

(iii) वीर बालायाः नाम किम्?

(iv) प्रथमे का अर्जनीया?

(v) विपदि किं आवश्यकम्?

(vi) श्रवणः जनार्थं कुत्र गतः?

प्र.14 प्रश्नपत्रे समागतान् श्लोकान् विहाय पाठ्यपुस्कात् कंठस्थी कृतम् सुभाषित द्वयं लिखत। **(4)**

प्र.15 स्व प्राचार्यस्य कृते अवकाशार्थम् प्रार्थनापत्रं संस्कृते लिखत। **(4)**

**<u>अथवा</u>**

स्वमित्राय निमन्त्रणपत्रम् संस्कृते लिखत ।

प्र.16 अधोलिखतेषु पञ्च अशुद्ध कारक वाक्यानां शुद्धिः करणीया – **(1×5=5)**

(i) सुरेशः पुस्तकः पठति।

(ii) श्री गणेशं नमः।

(iii) कृष्णः मोदकं रोचते।

(iv) बालकः अश्वेन पतति।

(v) भवान् कुत्र पठसि।

(vi) मोहनः पितरं सह गच्छति।

प्र.17 अधोलिखत वाक्यानां क्रम संयोजनं कुरुत – (5)

(i) एवं शुकयोः भिन्न व्यवहारं दृष्ट्वा ऋषिः आश्चर्य सागरे निमग्नः।

(ii) कश्चित् एकः महान तपस्वी ऋषिः आसीत्।

(iii) संसर्गजा दोषगुणाः भवन्ति।

(iv) सः शुकः ऋषि दृष्ट्वा "मारयतु कुट्टयतु" इति अपरं च सीताराम सीताराम इति उक्तवान।

(v) स लोककल्याणार्थम् अहर्निशं भूतले भ्रमति स्म।

प्र.18 अधोलिखितं गद्यांशं सम्यक पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (5)

"विद्या सर्वेषां धनानां श्रेष्ठं धनमस्ति। तेन एव मनुष्यो– मनुष्यो भवति। अन्यथा विद्यारहितो पशु अस्ति। इदं धनम् चोराः चोरयितुं बान्धवाश्च विभाजयितुं न शक्नुवन्ति व्यये कृते इदं धनं सर्वदा वर्धते एव। विदेश गमने विद्या परम सहायिका भवति।

(i) उपर्युक्त गद्यांशस्य उचितं शीर्षकं लिखत।

(ii) कः धनम् श्रेष्ठं अस्ति?

(iii) विद्यारहितो मनुष्यः कः अस्ति?

(iv) व्यये कृते किं वर्धते?

(v) विदेश गमने का सहायिका भवति?

प्र.19 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – (10)

(i) मम पाठशाला

(ii) शिक्षकः

(iii) धेनुः

(iv) उद्यानम्

..............................